**B.A. 5th Semester (Honours) Examination, 2020-21**

**SANSKRIT**

**Course ID: 50916** **Course Code: AHSNS-503-DSE-1**

**Course Title: Veda**

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are requested to give their answers in their own words as far as practicable.*

1. **अधोलिखितेषु प्रश्नेषु पञ्चप्रश्नाः सुरगिरा देवनागरीलिप्या लघुतया च समाधेयाः।** **2x5=10**

   (a) भूमिसूक्तं कस्मिन् वेदे कस्मिन् काण्डे च वर्तते?

   (b) 'सा नो भूतस्य भव्यस्य पत्नी' इत्यत्र 'पत्नी'पदस्य कोऽर्थः? भूतस्य भव्यस्य च पत्नी का भवति?

   (c) सांमनस्यसूक्तस्य क ऋषिः? सूक्तेऽस्मिन् कति छन्दांसि सन्ति? कानि च तानि?

   (d) 'अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या' इत्यस्य मन्त्रपादस्य कोऽर्थः?

   (e) देवीसूक्तस्य का देवता? सूक्तमिदं कथं वाक्सूक्तम् इत्युच्यते?

   (f) 'चिकितुषी' इति पदस्य कोऽर्थः? कथं सा वाक् यज्ञार्हाणां प्रथमा उच्यते?

   (g) उषस्सूक्तस्य क ऋषिः? कश्च विनियोगः?

   (h) 'स्वसरस्य पत्नी' इत्यत्र का स्वसरस्य पत्नी? स्वसरस्य इति पदेन कस्य परामर्शः?

2. **अधोलिखितेषु भाष्यवचनेषु यथेच्छं द्वयं व्याख्येयम्।** **5x2=10**

   (a) "पार्थिवीं भूमिकामस्य" इति विहितायां पार्थिव्यां महाशान्तौ अस्यानुवाकस्य विनियोगः। तदुक्तं नक्षत्रकल्पे "सत्यं बृहद् इत्यनुवाकः पार्थिव्याम्" इति।

   (b) "सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता। तेन ह्येषा तादात्म्यमनुभवन्ती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं भवामीति स्वात्मानं स्तौति"।

   (c) "प्रातरनुवाके उषस्ये क्रतावाश्विनशस्त्रे च त्रैष्टुभे छन्दस्येतस्य सूक्तस्य विनियोगः।"

3. यथेच्छं **द्वयम् ऋषिच्छन्दोदेवताविनियोगनिर्देशपूर्वकं व्याख्येयम्।** **5x2=10**

   (a) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
   सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥

   (b) मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
   सम्यञ्च सव्रता भूत्वा वाचं वदत भद्रया॥

   (c) मया सो अन्नमत्ति यो विपश्यति
   यः प्राणिति य ईं शृणोत्युक्तम्।
   अमन्तवो मां त उप क्षियन्ति
   श्रुधि श्रुत श्रद्धिवं ते वदामि॥

(d) ऋतावरी दिवो अर्कैरबोध्या रेवती रोदसी चित्रमस्थात्।
आयतीमग्न उषसं विभातीं वाममेषि द्रविणं भिक्षमाणः॥

4. **अधस्तात् कस्यचिदेकस्य प्रश्नस्योत्तरं वैशद्येन विधेयम्।** **10x1=10**

(a) उषोदेव्याः चरितवर्णनं पाठ्यगतं सूक्तमाश्रित्य वैशद्येन कुरुत।

(b) वाक्सूक्ते प्रतिपादितम् अद्वैततत्त्वं समासेन विवृणुत।

(c) सांमनस्यसूक्ते प्रतिपादितं तत्त्वं वैशद्येन व्याख्याय राष्ट्रस्य अभ्युदयेऽस्य सूक्तस्य गुरुत्वमस्ति न वेति समासेन विचार्यताम्।